Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 6 | ISSN : 2581- 6306

# साम्प्रतिककाले शिक्षाजगति मूल्याङ्कनस्यावश्यकता

डा. दत्तहरि बेहेरा
सहाध्यापकः, शिक्षाशास्त्रविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी

**Article Info**
Volume 5, Issue 2

**Page Number :** 131-135

**Publication Issue :**
March-April-2022

**Article History**
Received : 01 March 2022
Published : 17 March 2022

**शोधसारः** "शिक्ष विद्योपादाने" इति धातोः टाप् प्रत्ययात् शिक्षा इति शब्दः निष्पन्नः। तदनुसारं शिक्षयते उपादीयते विद्या यया सा शिक्षा । अर्थात् येन विद्या उपार्जनं क्रियते, सा अज्ञानरूपि बन्धनात् मुक्तिप्रदात्री भवति। अधिगम प्रदानस्यापेक्षया स्वतः अधिगमस्य योग्यतोपरि बलं दीयते। तदर्थं प्रत्येकं बालकस्य शिक्षणाय वैयक्तिकावधानं परमावश्यकम् । व्यक्तिगतशिक्षणं शिक्षामनोविज्ञानेनैव सम्भवति। शिक्षायाः उद्देश्यमस्ति यत् बालके सक्रियतया जन्मजातशक्तीनां विकासकरणमेव। अतएव शिक्षाप्रदानस्य प्रक्रिया अपि जटिला सञ्जाता । अतः एतादृश्यां परिस्थितौ अध्यापकानां कर्तव्यं भवति यत् ते बालकस्य शारीरिक- मानसिक - योग्यता - रुचिनामध्ययनं कृत्वा तस्य क्षमतानां योग्यतानाञ्चानुरूपेण शिक्षयेयुः। मानवीयव्यवहारं परिशीलयति मनोविज्ञानशास्त्रम् । शिक्षा व्यवहारस्य विपरिणाम सम्पादने महत्वपूर्णं साधनं भवति । अतः अनयोर्मध्ये अत्यन्त निकटतमः सम्वन्धः वर्त्तते। बालमनोविज्ञानं विना अध्यापकैः स्वीय कार्यं सुष्ठु सम्पादयितुं न शक्यते । स्वाभिलषितरीत्या छात्रेषु व्यवहारसंपादनाय मनोविज्ञानस्य ज्ञानमनिवार्यं भवति। मूल्याङ्कने सम्पूर्णव्यक्तित्वस्याकलनं क्रियते। प्रायः मूल्याङ्कने एतत् ज्ञायते यत् पूर्वनिर्धारित मानदण्डानुसारं शिक्षासेवायाः कृते छात्रः उत्तीर्णः भवति उत न । प्रायः अस्मिन् एतत्सरूपं दृश्यते चर्चा, सहयोगः, उपस्थितिः शाब्दिक क्षमता च । मापन प्रक्रिया अन्तर्गत कस्यचित् वस्तुनः आङ्गिक स्वरुपः (Quantitative Forum) प्रदीयते । परं मूल्याङ्कने तस्यैव वस्तुनः मूल्यं गुणवत्ता वा निर्धार्यते ।शिक्षाक्षेत्रे मूल्याङ्कनमेकं प्राबिधिक शब्दरुपेण प्रयुज्यते । अस्यां प्राविधिकप्रक्रियायां न केवलं छात्रस्य विशेषविषयसम्बन्धियोग्यतानां ज्ञानं प्राप्यते। अपि तु शिक्षणं पाठ्यक्रमः शिक्षणाविधीनां सफलतेति विषये सूचनाः प्राप्यन्ते। एतैः सह छात्रस्य सम्पूर्णव्यक्तित्वविकाससीमान्तज्ञानाय मूल्याङ्कनप्रक्रियायाः साहाय्यं स्वीक्रियते। एतस्य शोधसारस्य वर्णनं शोधपत्रे करिष्यते।

**मुख्यशब्दाः -** मूल्यांकनम्, आकलनं, वस्तुनिष्ठ, शिक्षणव्यूह, परिणाम आदयः।

मूल्याङ्कनं सतत प्रक्रिया अस्ति । मूल्याङ्कनं संपूर्ण शिप्रणाल्याः अङ्गं वर्तते। मूल्याङ्कनं गुणात्मकं भवति। मूल्याङ्कने त्रयाणां पक्षाणां समावेशः भवति। 1) ज्ञानात्मकपक्षः, 2) भावात्मकपक्षः 3) क्रियात्मकपक्षः । अस्य क्षेत्रं

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

व्यापकं भवति । कस्यापि वस्तुनः घटनानां, गुणानां वा सामाजिक सांस्कृतिकपरिवेशे मूल्यप्रदानं क्रियते। मापनमूल्याङ्कनयोर्मध्ये धनिष्ठसम्बन्धः विद्यते । मापनेन प्राप्तस्य परिणामाभिष्टस्य परीक्षणं मूल्याङ्कनेन भवति । मापने एकस्य वस्तुनः विशेषतायाः मात्रात्मकतायाः गुणात्मकतायाः वर्णनं क्रियते। परं मूल्याङ्कने मात्रात्मकतायाः गुणात्मकतायाः गुणवत्ता निर्धार्यते । अतः मूल्याङ्कने अङ्कप्रदानानन्तरं मूल्यानां निर्धारणं क्रियते ।

मूल्याङ्कने सम्पूर्णव्यक्तित्वस्याकलनं क्रियते। प्रायः मूल्याङ्कने एतत् ज्ञायते यत् पूर्वनिर्धारित मानदण्डानुसारं शिक्षासेवायाः कृते छात्रः उत्तीर्णः भवति उत न। प्रायः अस्मिन् एतत्सरूपं दृश्यते चर्चा, सहयोगः, उपस्थितिः शाब्दिक क्षमता च । मापन प्रक्रिया अन्तर्गत कस्यचित् वस्तुनः आङ्गिक स्वरुपः (Quantitative Forum) प्रदीयते । परं मूल्याङ्कने तस्यैव वस्तुनः मूल्यं गुणवत्ता वा निर्धार्यते ।

**मूल्याङ्कनस्यार्थः** मूल्याङ्कने व्यक्तेः, समाजस्य उभयोः दृष्ट्या यत् उत्तमम् अभीष्टं वा तमेवाधारीकृत्य मूल्याङ्कनं भवति । मापनक्रियान्तर्गत कस्यचित् वस्तुनः आङ्गिककस्वरुपः (Quantitative Form) प्रदीयते । परं मूल्याङ्कने अस्यैव विपरीतं भवति । अर्थात् तस्यैव वस्तुनः मूल्यं गुणावत्ता वा निर्धार्यते अर्थात् मूल्याङ्कनं तादृशस्य सत्यस्य निरुपणं क्रियते यत् किम् उत्तमम् किम् अनुत्तमम् इति ? अतः यदा कदाचित् यस्य कस्यश्चित् व्यक्तेः वस्तुनः गुणदोषाणाम् अवलोकने मूल्याङ्कनं निहितं भवति ।

शिक्षाक्षेत्रे मूल्याङ्कनमेकं प्राबिधिक शब्दरुपेण प्रयुज्यते । अस्यां प्राविधिकप्रक्रियायां न केवलं छात्रस्य विशेषविषयसम्बन्धियोग्यतानां ज्ञानं प्राप्यते। अपि तु शिक्षणं पाठ्यक्रमः शिक्षणाविधीनां सफलतेति विषये सूचनाः प्राप्यन्ते । एतैः सह छात्रस्य सम्पूर्णव्यक्तित्वविकाससीमान्तज्ञानाय मूल्याङ्कनप्रक्रियायाः साहाय्यं स्वीक्रियते । अतः स्पष्टमिदं यत् मूल्याङ्कनप्रक्रिया एकाङ्गि (one demension) प्रक्रिया नास्ति । विभिन्नकार्याणां श्टङ्गला भवति, यस्यान्तर्गत वहूनां सोपानानां सम्मेलनम् अपि अस्ति । अतः संक्षेपेण वक्तुं शक्यते यत् मूल्याङ्कनमेका निर्णयात्मिका प्रक्रिया ।

➢ **मूल्याङ्कनस्योद्देश्यानि कार्याणि च**

★ पाट्यक्रमे आवश्यक संशोधनम् ।

★ परीक्षाप्रणाल्यां सुधारः ।

★निर्देशन-परामर्शायाश्च उचितावसरप्रदानम् ।

★छात्राणां व्यवहारपरिवर्तनस्य परीक्षणम् ।

★अध्यापकानां कार्यकुशलतानां सफलतानां च मापनम् ।

★छात्राणां दुर्वलतां ज्ञात्वा सहयोगप्रदानम् ।

★नवीनतम प्रभावशाली विधीनामन्वेषणम् ।

★अधिगम कठिनतायाः अन्वेषणम् ।

★बालकानां व्यक्तिगत सामाजिक आवश्यकतानां पूर्तये सूचना प्रदानम् ।

★उत्तमरुपेण शिक्षितुं प्रोत्साहनम् ।

★उपचारात्मक शिक्षणाय वलप्रदानम् । (शिक्षणव्यूह रचनायां सुधारः)

➢ **मूल्याङ्कनसमये केचन ध्यातव्यांशाः**

- मूल्याङ्कनस्य ध्येयम् प्रथममेव स्पष्टं भवेत् यतोहि शिक्षाप्रक्रियायाः एकमात्रकार्यं यत् वालकव्यवहारे अभीष्टपरिवर्तनम् ।
- मूल्याङ्कनोद्देश्यनिधारणानन्तरम् उपयुक्तमूल्याङ्कनोपकरणानां चयनं कर्तव्यम् ।
- मानवव्यवहारः अत्यन्तजटिलः, अतः तस्य मूल्याङ्कनाय व्यक्तित्वस्य विभिन्नाङ्गानां मापनं कर्तव्यम् ।
- मूल्याङ्कनस्य प्रत्येकं प्रविधीनां विभिन्नोपकरणानाम् उचितज्ञानं भवेत् ।
- मूल्याङ्कनं सावधानपूर्वकं भवेत्। यतो हि –
  (क) मापनं, मूल्याङ्कनं वा छात्राधिगमं प्रभावयति ।
  (ख) मूल्याङ्कनस्य दायित्वं विद्यालयः व्यक्तिः तथा अभिभावक इत्येतेषां सर्वेषामुपरि भवति ।
- मूल्याङ्कनस्य सिद्धान्तानां नैतिकमूल्यानां च यथा सम्भव पालनं कर्तव्यम् । येन –

(क) त्रुटिस्त्रोताणाम् अभिज्ञानं कर्तु शक्यते।
(ख) त्रुटीनां न्यूनीकरणं कर्तु शक्यते ।
(ग) त्रुटीनाम् अनुमानं कर्तुं शक्यते ।

➢ **मूल्याङ्कन प्रक्रियायाः सोपानानि**

- शिक्षणोद्देश्यानां निर्धारणं परिभाषीकरणञ्च ।
- अधिगमानुभवस्थ योजना निर्माणम् ।
- व्यवहारपरिवर्तनाधारेण मूल्याङ्कनम् ।

➢ **मूल्याङ्कन प्रविधयः** मापनमूल्याङ्कनयोः नैके विधयः प्रयलिताः दृश्यते । तेषु केषाञ्चनानां स्थालिपुलकन्यायेन संक्षेपेण विचार्यते । यथा–

❖ मात्रात्मकविधयः (Quantitative Method) नियन्त्रणनिरीक्षणविधिः (control observation Method), रेटिंगरकेल (Rating scale) वस्तुनिष्ठपरीक्षणम् (objective type test) अभिवृत्तिमापन्यः(Attitude scale) इत्येतानि परीक्षणानि मूल्याङ्कनस्य मात्रात्मकविधि अन्तर्गतानि भवन्ति ।

❖ गुणात्मकविधयः (Qualitative Methods) मौखिक परीक्षणं (Orral test), लिखितपरीक्षणं (written test), निवन्धात्मकपरीक्षणम् (Essay type text), प्रयोगात्मक परीक्षणं (Practical test), संञ्चितालेखा (cumulative records), परीक्षणसूची check list), जीवनवृत्यालेख इत्यादिनि परीक्षणानि मूल्याङ्कनस्य गुणात्मक विध्यन्तर्गतानि भवन्ति ।

❖ निरीक्षणात्मकविधयः (Observational Method) शैक्षिक मूल्याङ्कने निरीक्षणात्मकविधीनां महान् उपयोगः विद्यते । अत्र अनियन्त्रितनिरीक्षण विधिः (uncontrolled observation Method), नियन्त्रित

निरीक्षणविधि: (Controlled observation method) सहभागिनिरीक्षणविधि: (participant observation Method), असहभागिनिरीक्षणविधि: (Non-participant observation Method) आदि परीक्षणानि निरीक्षणात्मकविधिषु, अन्तर्भावता भवन्ति।

❖ स्वसूचितप्रविधय: (Self-Reporting Techniques) शैक्षिकमूल्याङ्कनाय स्वसूचितप्रविधे: महत्वनिर्वचनीयम् । आलेख (Record), प्रश्नावली, नियन्त्रित साक्षात्कार: (controlled interview),

अनियन्त्रित साक्षात्कार: उपचारात्मक साक्षात्कार:, व्यक्ति इतिहास: (case study) इत्यादिविधय: अस्यप्रविध्यन्तर्गता: भवन्ति। एतेषु विधिषु दत्तांशानां संकलनं प्रत्यक्षरूपेण क्रियते ।

❖ प्रक्षेपविधय: (projective Method) समाजमनोवैज्ञानिकै: परीक्षण प्रविधे: तादृशस्य विकास: कृत: येन अप्रत्यक्षरुपेण परं वास्तविकानौपचारिकगहनदत्तांशानां प्राप्ति: जायते । अयमेव अप्रत्यक्षविधि: (Indirect Method) प्रक्षेपणविधि:(projective Method) इत्युच्यते । शैक्षिकमूल्याङ्कने एतादृशानां नैकानां प्रक्षेपणविधीनाम् उपयोग: दरीदृश्यते । तेषु केषाञ्चित् प्रमुखाणां नामानि इत्थं यथा । साहचर्यात्मकविधि: (Association Techniques), रचनाप्रविधि: (Construction techniques), पूर्णात्मप्रविधि: (Completion techniques), भूमिकानिर्वाह प्रविधि (Roleplaying techniques) इत्यादय: ।

❖ मनोवैज्ञानिक शैक्षिकवरीक्षणानि (Educational & Psychological texts) अद्यत्वे वस्तुपरकाध्ययनस्य आवश्यकता महत्ती परिलक्षते। शैक्षिकमूल्याङ्कने बुद्धिपरीक्षणं,अभिक्षमतापरीक्षणं, उपलब्धिपरीक्षणं इत्यादिनां उपयोग: सर्वाधिकतया दृश्यते।

★ मूल्याङ्कनस्य प्रकारा: (Types of Evaluation)

1) संरचनात्मक मूल्याङ्कनम् (Formative Evaluation)
2) योगात्मक मूल्याङ्कनम् (Formative Evaluation)

**संरचनात्मक मूल्याङ्कनम्** (Formative Evaluation) संरचनात्मक मूल्याङ्कनस्यार्थ: योजना प्रक्रिया सामग्रीणां मूल्याङ्कनम्, येन मूल्याङ्कनस्याधारे सुधार: भवति । यदि काचित् शैक्षिक योजनाया: प्रारम्भिक अथवा निर्माणावस्थायां मूल्याङ्कनं कृत्वा तासु अपेक्षित परिवर्तनमानेतुं शक्यते तर्हि तादृश मूल्याङ्कनं संरचनात्मक अथवा निर्माणात्मक मूल्याङ्कनमुच्यते । कस्यापि योजनाया: अन्तिमप्रारुप प्रदानात् प्रागेव तस्मिन् परिवर्तनमानयनं भवति संरचनात्मक मूल्याङ्कनम् ।

**योगात्मक मूल्याङ्कनम्** - (Summative Evaluation) शैक्षिक कार्यक्रमस्यान्तिम प्रारुप प्रदानादनन्तरं क्रियमाण मूल्याङ्कनं भवति योगात्मकमूल्याङ्कनम् । अस्य मूल्याङ्नस्योद्देश्यं भवति अग्रे स: कार्यक्रम: चालयते न वा इति निर्णय स्वीकरणम् । कदाचित् कार्यक्रम अग्रे चाल्यते मध्ये स्थगितं क्रियते, नोचेत् सम्पूर्ण त्यज्यते

➢ **वर्तमानयुगे मूल्याङ्कनस्यावश्यकता-** आजीवनं प्रचलिता सततप्रक्रिया एव शिक्षा । मानव: अनेकानि तथ्यानि शिक्षते, तेषां च स्वजीवने प्रयोगं करोति । तेन व्यवहारेषु परिवर्तनानि भवन्ति । जीवनं यावत् चलनप्रक्रिया अपेक्षितानि उद्देश्यानि पूरयति न वा इत्यस्य ज्ञानं मूल्याङ्कनेन भवति। शिक्षा-प्रक्रियायां त्रीणि पदानि विद्यन्ते ।

उद्देश्यानां निर्धारणम्, उद्देश्यप्राप्यर्थं प्रदत्ता: अनुभवा:, तथा अपेक्षित - उद्देश्यानां प्रापणस्य सम्भावनां ज्ञातुं मापनं मूल्याङ्कनञ्च ।

वत्तमानयुगे सर्वमपि कार्यसाधनार्थ मूल्याङ्कनस्यावश्यकता अतीव महत्वपूर्णा । विपणीषु, आपणीषु, विद्यालयेषु, चिकित्सालयेषु, पुस्तकालयेषु सर्वेषु क्षेत्रेषु मूल्याङ्कनस्यावश्यकता नर्तते ।

मूल्याङ्कन प्रक्रियायां निर्णय: अत्यावश्यक: शिक्षाया: प्रत्येकेऽस्मिन् क्षेत्रे परिपक्व निर्णय: वस्तुनिष्ठ निर्णय: वा आवश्यक: । मूल्याङ्कनस्य प्रक्रिया पूर्णरुपेण मनोवैज्ञानिकमस्ति । मूल्याङ्कनेन वालक: स्वनिष्पत्तौ सफलतां प्राप्नोति तथा च कार्यकरणे तत्परो भवति । एतदर्थमेव मूल्याङ्कनस्य प्रविधय: उद्देश्यपूर्णा: विश्वसनीचाश्य भवेयु: । मूल्याङ्कनेन सम्पूर्णव्यक्तित्वस्य प्रगतिविषये वक्तुं शक्यते तथा छात्र: स्व उपलब्धीनां विषये ऽपि ज्ञातुं समर्थो भवति येन तस्य प्रसन्नतायां वृद्धिर्भवति । अत: मूल्याङ्कनस्य कृते विधिप्रयोग: पूर्णरुपेण स्पष्टो भवेत् ।

मूल्याङ्कनं शैक्षिक प्रक्रियाया: एकम् अभिन्नाङ्गम् इति न अपि तु जीवनस्य प्रत्येक प्रक्रियाया: महत्वपूर्णाङ्गम् । यथा वैद्य: स्व औषधानां प्रभावस्य मूल्याङ्कनाम् अस्वास्थ्यनिवाधरेण करोति, कश्चित् उद्यानपालक: कोमल- लतानां वृक्षाणां मूल्याङ्कनं सुन्दरताधारेण करोति । तथैव शिक्षक: स्वप्रभाविशिक्षणस्य मूल्याङ्कनं छात्रस्य अभीष्ट व्यवहारिकपरिवर्तनेन करोति । पुस्तकविक्रयणात् पूर्वमेव अथवा पुस्तकस्य रचना क्रियमाणा अस्ति । रचना जायमाना अस्ति पुस्तकस्थ रचनाकार्य इदानीमन्तिमपर्याये नास्ति, परं पुस्तकस्य पाठ्यसामग्रीणां गुणावत्तां कथं वर्द्धत एतदर्थी मूल्याङ्कनं क्रियते ।विपणीषु पुस्तकविक्रयात् पूर्वं तत्र तत: पूर्वं रचनावस्थायां कथं अधिकाधिक सुधार: भवेत्, पुस्तकं परिष्कृतं शुद्ध च भवेत् एतस्य कृते उपाय: मूल्याङ्कन माध्यमेन क्रियते ।

छात्रप्रगते: मापनहेतो: मूल्याङ्कनशब्दस्य प्रयोग: । एतादृशमूल्याङ्कनं केवलम् एका प्रक्रिया । यत् केषाञ्चित् निष्कर्षाणां प्राप्तये सहायिका भवति । मूल्याङ्कनस्य कानिचन वैशिष्ट्यानि सन्ति । यथा- एकानिश्चतावधिषु यथा त्रैमासोकपरीक्षा, बाषमासिकपरीक्षा, वार्षिकपरीक्षा। एतासु परीक्षासु कासाञ्चित् परीक्षाणां परिस्थितीनां वा आधारेण छात्रेभ्य: अङ्कप्रदानं क्रियते । यत्र बालकस्य शारीरिक मानसिक - साम्वेगिक - नैतिकानां पक्षाणां दृष्या व्यक्तित्वस्य समूचितविकासेन सह समाजादर्शमानदण्डानुकूलं वा शिक्षाप्रक्रिया चलति वा न इति विषयस्योपरि विशेषध्यानं प्रदायते । एतेषां व्यावहारिकपरिवर्तनानां समयेषु मूल्याङ्कनं चलति।

**निष्कर्ष**:- मूल्याङ्कनमुद्देश्यप्राप्तिसीमा निर्धारणाय काचित् प्रक्रिया । अत्र निर्देशपरिणामान् परीक्षणाय शिक्षकै:, छात्रै: प्रशासनै:, विद्यालयस्यान्यकर्मचारिभि: प्रयुक्तसमस्तप्रक्रिया: सम्मिलिता: भवन्ति । मूल्याङ्कनकार्ये त्रुटय: अपि भवन्ति । अत: कार्येऽस्मिन् सावधानता जागरुकता वा अपेक्षते । अत: कार्यमिदं सम्पूर्णदायित्वेन साकं सम्वन्धितम् ।मूल्याङ्कने व्यक्तित्वसम्बन्धिपरिवर्तनानां तथा शैक्षिककार्यक्रमाणां प्रमुख उद्देश्येषु वलं दीयते । धात्राणां व्यवहारेषु विद्यालयकृतपरिवर्तनानां विषचे प्रमाणानां सङ्कलनं तस्य व्याख्याकरणस्य च प्रक्रिया मूल्याङ्कनमाध्यमेन क्रियते।

**सन्दर्भग्रन्थसूची**: -


1. शिक्षामनोविज्ञानम् - पि. नागमुनिरेडि- रा.सं.विद्यापीठम् तिरुपति- 2008 ।
2. शिक्षामनोविज्ञानम्- डा. फतेहसिंह:- आदित्यप्रकाशनम् जयपुरम्- 2013 ।
3. शिक्षाया: मनोवैज्ञानिकध्यारा:-वि.पि. एम्. श्रीनिवास:, जगदीशसंस्कृत पुस्तकालय:, जयुपुरम् -2012।
4. शिक्षामनोविज्ञानम् - S.K. Mongal - PHI Learning.... Pvt. New Delhi.
5. मापनं मूल्याङकनं च - पि वेङकट राव - रा.सं.विद्यापीठम् तिरुपति- 2008 ।